# RAMAKRISHNA MISSION VIDYAMANDIRA
(Residential Autonomous College under University of Calcutta)

**B.A./B.Sc. FIRST SEMESTER EXAMINATION, DECEMBER 2019**
**FIRST YEAR (BATCH 2019-22)**
**SANSKRIT (General)**
**Paper : I**

Date : 16/12/2019
Time : 11 am – 2 pm
Full Marks : 75

1a. **एकः** प्रश्नः समाधेयः। [1×10]

क) संस्कृतसाहित्ये जयदेवकवेः काव्यस्य वैशिष्ट्यानि उल्लिख्यन्ताम्।

ख) पाठ्यांशमाश्रित्य जगदीशस्य दश अवताराः संक्षेपेण वर्णनीयाः।

1b. यथेच्छं पद्य**द्वयस्य** वङ्गभाषया आङ्गलभाषया वा अनुवादः करणीयः। [2×5]

क) मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमै–
नर्क्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः।।

ख) यदि हरिस्मरणे सरसं मनो
यदि विलासकलासु कुतूहलम्।
मधुरकोमलकान्तपदावलीं
शृणु तदा जयदेवसरस्वतीम्।।

ग) प्रलयपयोधिजले धृतवानसि वेदम्।
विहितवहित्रचरित्रमखेदम्।।
केशव धृतमीनशरीर जय जगदीश हरे।

घ) वाग्देवताचरितचित्रितचित्तसद्म
पद्मावतीचरणचारणचक्रवर्ती।
श्रीवासुदेवरतिकेलिकिथासमेत–
मेतं करोति जयदेवकविः प्रबन्धम्।।

2a. सप्रसङ्गं पद्य**मेकं** व्याख्येयम्। [1×8]

क) धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु।।

ख) तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतो–
रन्तर्वाष्पश्चिरमनुचरो राजराजस्य दध्यौ।
मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे।।

2b. यथेच्छं पद्य**द्वयस्य** वङ्गभाषया आङ्गलभाषया वा अनुवादः करणीयः। [2×6]

क) कश्चित् कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः
शापेनास्तंगमितमहिमा वर्षभोग्येण भर्तुः।

यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु।।

ख) जातं वंशे भुवनविदिते पुष्करावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोन:।
तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा।।

ग) तत्रागारं धनपतिगृहानुत्तरेणास्मदीयं
दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन।
यस्योपान्ते कृतकतनय: कान्तया वर्धितो मे
हस्तप्राप्यस्तवकनमितो बालमन्दारवृक्ष:।।

घ) सव्यापारामहनि न तथा पीडयेन्मद्वियोग:
शङ्के रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते।
मत्सन्देशै: सुखयितुमलं पश्य साध्वीं निशीथे
तामुन्निद्रामवनिशयनां सौधवातायनस्थ:।।

3a. प्रश्न**द्वयं** समाधेयम्। [2×10]

क) भारतवर्षस्य समाजे साहित्ये च रामायणस्य प्रभाव: आलोचनीय:।
ख) भारवे: कृतिमवलम्ब्य एक: प्रबन्ध: रचनीय:।
ग) अश्वघोषस्य रचनावलीमाश्रित्य एक: प्रबन्ध: बिरचनीय:।
घ) भासरचितदृश्यकाव्यानां संक्षिप्तपरिचय: प्रदेय:।

3b. यथारुचि विषयद्वयमवलम्ब्य संक्षिप्तटीका**द्वयं** विरचनीयम्। [2×5]

क) श्रीमद्भगवद्गीता।
ख) रत्नावली।
ग) ऋतुसंहारम्।
घ) रामायणस्य रचनाकाल:।

3c. यथेच्छं **पञ्च** प्रश्ना: समाधेया:। [5×1]

क) महाभारतं केन विरचितम्?
ख) स्वप्नवासवदत्तनाटके कति अङ्का: सन्ति?
ग) कस्मिन् शिलालेखे कालिदासनाम्ना सह भारविनाम प्राप्यते?
घ) रघुवंशमहाकाव्ये कति सर्गा: सन्ति?
ङ) रामायणस्य कस्मिन् काण्डे लङ्कादहनं वर्णितम्?
च) मेघदूतं केन छन्दसा रचितम्?
छ) कुमारसम्भवमहाकाव्यस्य रचयिता क:?
ज) सीतापहरणवृत्तान्त: रामायणस्य कस्मिन् काण्डे समुपलभ्यते?

———— × ————